# अमरेन्द्रमोहनभट्टाचार्यविरचितन्यायप्रवेशाख्यग्रन्थस्य अनुवादः समीक्षा च

Alok Sen
PhD Research Scholar
Ramakrishna Mission Vivekananda
Educational and Research Institute

**कूटशब्दाः**

सामान्यम् (sāmānyam), व्याप्तिः (vyāptiḥ), प्रतियोगिता (pratiyogitā), अवच्छेदकता (avacchedakatā), पदार्थः (padārthaḥ), ईश्वरः (īśvaraḥ), साधर्म्यम् (sādṛśyam), तमः (tamaḥ), परमाणुः (paramāṇuḥ), अयुतसिद्धः (ayutasiddhaḥ), यौगः (yaugaḥ), प्रमा (pramā)।

वङ्गप्रदेशीयनैयायिकेषु स्वातन्त्र्यपूर्वकालादारभ्य उत्तरकालं यावत् आचार्यः अमरेन्द्रमोहनभट्टाचार्यः बभूवः। आचार्यस्य स्थितिकाल आसीत् १८६२-१९५७तमं खीष्टाब्दपर्यन्तम्। स्वतन्त्रतायाः पूर्वकाले तेन न्यायदर्शन-सप्तपदार्थी-आलोकसहित-काव्यप्रकाशग्रन्थानां सम्पादनम्, गीताञ्जलिग्रन्थस्य संस्कृतानुवादः किञ्च न्यायवैशेषिकदर्शनयोः न्यायप्रवेशाख्यः स्वतन्त्रप्रकरणग्रन्थश्च चक्रे। दशवर्षपर्यन्तं कृतभूरीपरिश्रमेण लिखितो न्यायप्रवेशग्रन्थः वङ्गभाषायां भारतीयज्ञानविज्ञानेतिहासदर्शनकृष्यर्थनीतिशिल्पादिचर्चायै प्रतिष्ठापितायां श्रीभारतीपत्रिकायां निरन्तरम् अप्रकाश्यत। ततः अष्टचत्वारिंशदधिकैकत्रिंशच्छततमे (1348-) वङ्गाब्दे इण्डियान्-रिसार्च-इन्स्टिटिउट् इत्यस्मात्प्रकाशनालयात् सतीशचन्द्रशीलमहोदयस्य प्रकाशकत्वेन तत्त्वावधानेन प्रकाशितांशेन सह किञ्चिदंशं योजयित्वा संस्कृत्य च वङ्गभाषायां लिखितस्य न्यायदर्शनस्य द्वितीयग्रन्थरूपेण प्रकाशितः। वङ्गभाषायां विरचितः न्यायदर्शनस्य प्रथमो ग्रन्थोऽस्ति महामहोपाध्यायफणिभूषणतर्कवागीशविरचितं न्यायदर्शनम्।

न्यायशास्त्रे प्रसिद्धदुरूहभाषाशैलीं परित्यज्य व्यवहारिकभाषायामपि न्यायशास्त्रीय-तत्त्वावबोधो भवतु इत्यभिप्रायेन ग्रन्थकारेण वङ्गभाषायां विरचितोऽयं ग्रन्थः। अत्र ग्रन्थकारेण

न्यायवैशेषिकदर्शनप्रतिपाद्यतत्त्वविवेचनपुरःसरं स्वकीयं नवीनं चिन्तनमपि तत्र तत्र ग्रन्थे प्रकाशितम्। यद्यपि तर्कसंग्रहादयो बहवः प्रकरणग्रन्थाः प्रचलिता वर्तन्ते तथापि ग्रन्थस्यास्य रचनारीतौ किञ्चिद्विशेषो वर्तते। तर्कसंग्रहादिषु केवलं शास्त्रीयतत्त्वानां सिद्धान्तमात्रं प्रतिपादितमस्ति। परन्तु ग्रन्थेऽस्मिन् व्याख्यानपुरःसरं लौकिकोदाहरणसहितं शास्त्रीयतत्त्वम्, क्वचिच्च आधुकविज्ञानदृष्ट्या अपि शास्त्रीयतत्त्वं प्रतिपादितम्।

तथाहि सम्पूर्णस्यास्य ग्रन्थस्य अनुवादं विधाय तत्र प्रतिपादितानां तत्त्वानां यथामति समीक्षणमेव शोधप्रबन्धेऽस्मिन् सुचारुरूपेणे न्यबध्यत। वङ्गभाषायां विरचितत्वेऽपि वङ्गीयानां मध्ये एव ग्रन्थस्यास्य तथा परिचितिर्नास्ति किमुत इतरेषाम्। तथाहि नव्यन्याये प्रसिद्धभाषाशैलीम् अनाश्रित्य सरललौकिकभाषायां विरचितस्य लौकिकोदाहरणेन परिपुष्टस्य अस्य ग्रन्थस्य न केवलं दार्शनिकपरिमण्डलेषु समग्रसारस्वतसेवाव्रतिषु प्रचारप्रसारणमेव अस्य शोधकार्यस्य उद्देश्यम्। किञ्च, अधुना ये छात्राः *तर्कसंग्रहकारिकावली*प्रभृतिषु न्यायवैशेषिकशास्त्रीयप्रारम्भिकग्रन्थेषु काठिन्यम् अनुभवन्ति तत्त्वप्रतिपादनरीतेः सारल्यात् तेषामस्मिन् ग्रन्थे अबाधेन प्रवृत्तिर्भवतीति आशास्महे।